# Dvijaproktam Shivarchanopadesham 3

# દ્વિજપ્રોક્તં શિવાર્ચનોપદેશમ્ ૩

## Document Information

Text title : Dvijaproktam Shivarchanopadesham 3

File name : dvijaproktaMshivArchanopadesham3.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 23| 571-586||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# દ્વિજપ્રોક્તં શિવાર્ચનોપદેશમ્ ૩

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

દ્વિજ ઉવાચ ।

વિભૂતિધારણં કૃત્વા શિવૈકશરણોઽધુના ।
સર્વાઘૌઘનિવૃત્ત્યર્થં રુદ્રમાવર્તય દ્વિજ ॥ ૫૭૧॥

શિવમન્ત્રસમૂહોઽયં રુદ્રાધ્યાયઃ શિવાત્મકઃ ।
અતસ્તદ્રુદ્રપાઠેન નશ્યત્યઘકુલં ક્ષણાત્ ॥ ૫૭૨॥

નામૈકમપિ રુદ્રસ્ય સર્વપાપવિનાશકમ્ ।
સ્વર્ગાપવર્ગફલદં શૈવં જપ્તં ન સંશયઃ ॥ ૫૭૩॥

કૃત્વાપ્યઘકુલં નિત્યં શિવૈકશરણો દ્વિજ ।
યદિ રૌદ્રં જપેન્મન્ત્રં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૫૭૪॥

રુદ્રસ્મરણમાત્રેણ મહાપાતકકોટયઃ ।
વિનશ્યન્ત્યનલક્રાન્તાઃ શલભા ઇવ તત્ક્ષણે ॥ ૫૭૫॥

તાવદેવ હિ પાપાનિ યાવન્ન સ્મર્યતે શિવઃ ।
સ્મૃતે શિવે પાતકાનિ વિનશ્યન્તિ બહૂન્યપિ ॥ ૫૭૬॥

અશૈવા યે ભવિષ્યન્તિ તે મહાપાતકાલયાઃ ।
પાપાનિ સ્વાલયં ત્યક્ત્વા તિષ્ઠન્તિ ન કદાચન ॥ ૫૭૭॥

પુણ્યાલયેષુ શૈવેષુ પુણ્યાન્યેવ ન સંશયઃ ।
ન તિષ્ઠન્તિ હિ શૈવેષુ પાતકાનિ કદાચન ॥ ૫૭૮॥

પુણ્યૈકનિલયઃ શૈવો નાશ્રયઃ પુણ્યપાપયોઃ ।
પુણ્યપાપાશ્રયો નૈકસ્તેજસ્તિમિરયોરપિ ॥ ૫૭૯॥

યદા યત્રોજ્જ્વલં તેજો ન તત્ર તિમિરં તદા ।
તતો યદા યત્ર પુણ્યં તદા તત્ર ન પાતકમ્ ॥ ૫૮૦॥

તતો યદા યત્ર પુણ્યં તદા તત્ર ન પાતકમ્ ।
મૃદ્ઘટે સઙ્ગૃહીતસ્ય જલસ્ય ક્ષરણં યથા ॥ ૫૮૧॥

તથા શૈવકૃતાઘાનિ ક્ષરન્ત્યેવ ક્ષણે ક્ષણે ।
અદ્યપ્રભૃતિ ભો વિપ્ર શૈવો ભૂત્વા શિવં યજ ॥ ૫૮૨॥

શિવઃ શૈવકૃતાં પૂજાં પ્રીત્યા ગૃહ્ણાતિ સાદરમ્ ।
શૈવો ભૂત્વા બિલ્વપત્રૈર્યઃ પૂજયતિ શઙ્કરમ્ ॥ ૫૮૩॥

સર્વપાપવિનિર્મુક્તો ભુક્તિં મુક્તિં ચ વિન્દતિ ।
શિવલિઙ્ગાર્ચનેનૈવ તુષ્ટો ભવતિ શઙ્કરઃ ॥ ૫૮૪॥

સન્તુષ્ટઃ પાર્વતીનાથઃ પ્રયચ્છત્યેવ વાઞ્છિતમ્ ।
શૈવો ભૂત્વા મહાદેવં પૂજય શ્રદ્ધયાન્વહમ્ ॥ ૫૮૫॥

શિવપૂજાં કુરુ પ્રીત્યા પાતકેભ્યો ભયં ત્યજ ।
કર્મણા મનસા વાચા ભવાનીરમણં યજ ॥ ૫૮૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે દ્વિજપ્રોક્તં શિવાર્ચનોપદેશં ૩ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૩। ૫૭૧-૫૮૬॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 23 . 571-586..

Notes:

Dvija દ્વિજ delivers a detailed Upadeśa ઉપદેશ about the merits worship of Rudra-Śiva રુદ્ર-શિવ.

Proofread by Ruma Dewan

*Dvijaproktam Shivarchanopadesham 3*

pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*